शांशविभागिनः । अश्मानः क्षत्रिया ज्ञेयाः कर्कशाङ्गास्तथैव च (शङ्काः) YuktiKa. 139. 7.

अंशांशहवन (aṁśāṁśa-havana) *n.* offerings of very small portions तृप्तिं पूर्णप्रदानैस्तु अंशांशहवनैः कृतैः PauṣkS. 31. 142.

अंशांशांश (aṁśāṁśāṁśa) *m.* a part of a part of a part (केशवः) शंभोः कार्ये कृतमना अंशांशांशेन निर्गतः SkandP. iv. 58. 66 (comm. अंशः अन्तर्यामी, तस्यांशः पुरुषः तस्यांशश्चतुर्भुजः)

अंशांशिकप्रसङ्ग (aṁśāṁśika-prasaṅga) *m.* the occasion of mentioning the part and whole Loc. 158. 25 (*on* 3. 16)

अंशांशिकल्पना (aṁśāṁśi-kalpanā) *f.* the notion of part and whole एको यद्यंशो निमानमस्योदश्चित इति न भवति, एकस्यांशांशिकल्पनाभावात् । समता तु तदावगम्यते CāndraVṛ. *on* iv. 2. 49.

अंशांशिका (aṁśāṁś-ikā) *f.* a small fraction, a very small part, very little न ह्यंशांशिकया चोदकः प्रवर्तते NyāyMañ. i. 45. 9; मितदृष्टयस्तु अंशांशिकासु तदिच्छयैव अभिमानं ग्राहिताः PratyabhiHr. 19. 2 (*on* 8); ततः परं नास्त्येव तस्य सर्वपर्यन्तफलत्वादंशांशिकयापि PratyabhiVi. i. 42. 1 (*on* i. 1. 1)

अंशांशित्व (aṁśāṁśi-tva) *n.* the relation of part and whole तथापि शास्त्रात्त्वत्रांशांशित्वमीशित्रीशितव्यभावश्च निश्चीयते BrahmSūBh. (S'aṅ.) ii. 480. 14 (*on* ii. 3. 45); लोकप्रसिद्धन्यायार्थैरंशांशित्वादिकल्पना । परमात्मनः…न…युक्ता BrĀraUBhVā. ii. 1. 499; ii. 1. 524; ii. 1. 526; iv. 3. 661; तयोरेकान्ततो भेदेऽभेदे चांशांशित्वहानात् IṣṭaSi. 242. 8; ननु…तयोरेकद्रव्यत्वाभावेन नांशांशित्वमुपपन्नम् NītiMā. 51. 17; भिन्नयोर्नांशांशित्वमश्वमहिषवत् VedāntKa. 223. 26 (on i. 4. 22); किमभिद्रस्तुनो ब्रह्मस्वरूपत्वं…विशेषणविशेष्यभावरूपेणांशांशित्वेनेति S'rutaPra. ii. 443. 21 (*on* iii. 2. 26); अंशांशित्वाद्यभावेन पूर्ववन्नात्र संस्तुतिः NyāyaMāVi. 54. 16 (*on* i. 4. 13); TattvPrakā. 23A. 11 (*on* iii. 2. 34); VedāntTaSā. 60. 3.

अंशांशिन् (aṁśāṁśin) *adj.* part and whole न…ब्रह्मस्वरूपप्रतिपत्तिविषये ब्रह्मणः…अंशांश्येकदेशैकदेशिविकारविकारित्वकल्पना कार्या BrĀraUBh. 261. 16 (*on* ii. 1. 20); यद्यंशांशिनोर्विकारविकारिणोर्वा अत्यन्तभेदः स्यात् TattvSaṁkhyā. 50. 2; अंशांशिनोरभेदेनैवांशसंयोग एव NyāySu.(Ja.) 365B. 2 (*on* ii. 2. 6); 510A. 3 (*on* iii. 2. 10); तुशब्दोऽशांशिधर्मसाङ्कर्याभावसूचकः VedāntKau. 237. 14 (*on* ii. 3. 45)

अंशांशिभाव (aṁśāṁśi-bhāva) *m.* the relation or status of being a part and whole अंशांशिभावस्याविद्यमानत्वात् TātpaṬ.(U.) 154. 17 (*on* 4. 135); सत्यपि जीवेश्वरयोरंशांशिभावे प्रत्यक्षमेव जीवस्येश्वरविपरीतधर्मत्वम् BrahmSūBh. (S'aṅ.) 568. 2 (*on* iii. 2. 5); नानात्वे सत्येव अभेदो नामान्वयः अंशांशिभावलक्षणः ĀtmaSi. 4. 24; काल्पनिकस्यांशांशिभावस्यात एव मूल एव निहितः कुठारः ĀtmaTaVi. 299. 12; अंशांशिभावाद् भूतानां संख्यैषामतिरिच्यते SamarāSū. 31. 16; विशेषणविशेष्यभावेनैवांशांशिभावः VedāntDī. 162. 8 (*on* iii. 2. 29); अतस्तत्सिन्नपि पक्षे जीवपरमात्मनोरंशांशिभावो नोपपद्यते NītiMā. 52. 6; भेदोऽप्यंशांशिभावादिकृतो निरस्तो भवति PrakaVi. 256. 20; 655. 22; S'rutaPra. ii. 386. 24 (*on* ii. 3. 52); पितापुत्रयोरंशांशिभावो नैकदेशतादिरूपः NyāySu.(Ja.) 510A. 5 (*on* iii. 2. 10); शुद्धत्वं हि भेदस्यांशांशिभावासहचरितत्वम् SiddhāLeSaṁ. 337. 8; 340. 9; 459. 8; उक्तश्रुतिः…अविभागमात्रेणांशांशिभावं बोधयति SāṁkhyaPraBh. 133. 24 (*on* 5. 73); कलयांशेन अंशांशिभावघटकभेदभानेन SetuBa. 205. 12; VedāntPāSau. 235. 13 (*on* ii. 3. 42); S'aṅkaVi.(Ā) 50. 2; 113. 7.

अंशांशीभाव (aṁśāṁśī-bhāva) *m.* (= aṁśāṁśi-bhāva) नांशांशीभावश्चैकस्मिन्नीश्वरे PārāSū. 27. 18; अंशांशीभावः पृथ्वीनीरतेजोवायुषु दिव्येषु च PārāSū. 27. 25.

अंशागृहीति (aṁśāgṛhīti) *f.* non-apprehension of a part or portion अंशागृहीतेर्भ्रान्तिश्चेद्दृष्टज्ञानं भ्रमो भवेत् PañcDa. 7. 55.

अंशाग्रह (aṁśāgraha) *m.* non-cognition of a part or portion दोषादंशाग्रहे चेत्ते नाग्रहोऽतोऽपि तु भ्रमः IṣṭaSi. 261. 10; भिन्नाभिन्ने मृषाभेदधीश्चेदंशाग्रहो भ्रमः IṣṭaSi. 318. 1.

अंशाग्रहण (aṁśāgrahaṇa) *n.* non-cognition of a part किमिदानीमंशाग्रहणं भ्रान्तिः PramāMā. 10. 14.

अंशात्मक (aṁśātmaka) *adj.* consisting of parts or degrees अंशात्मकस्य मे ब्रह्मन् मलिनांशे तु वै पुनः । मालिन्यं जायते BṛBrahmS. ii. 2. 33; चापमंशात्मकमस्ति सिद्धम् SiddhāTaVi. 106. 6; 163. 1.

अंशाधिकरण (aṁśādhikaraṇa) *n.* the section of the Brahmasūtras (ii. 3. 43–53) discussing the view that the individual soul is an *aṁśa* of the supreme soul; VedāntSā.(Rā.) 216. 7 (*on* ii. 3. 42); S'atDū, 243. 24; NyāySu.(Ja.) 510A. 6 (*on* iii. 2. 10); GoviBh. 62. 4 (*on* i. 3. 43).

अंशाधिकारिन् (aṁśādhikārin) *adj.* entitled to a portion or share. यशसि वयमयं वा सुग्रीवो वा न केचिदंशाधिकारिणः AnargharaRā, 5. 51.

अंशाधिप (aṁśādhipa) *m.* the lord of the *navāṁśa* अंशाधिपजन्मपती …अस्तमुपागता यस्य । जन्मावसरे मरणं तस्य भवेत् HorāSā. 5. 35; Sārā. 10. 17.

अंशानन्त्यसाम्य (aṁśānantya-sāmya) *n.* similarity due to possessing infinite parts अंशानन्त्यसाम्येन मेरुसर्षपयोस्तौल्यप्रसङ्गश्च GoviBh. 121. 4 (*on* ii. 2. 11)

अंशानपेक्ष (aṁśānapekṣa) *adj.* without the need of the parts, independent of the parts बुद्धेरस्त्वंशानपेक्षा स्फुरति विषयिता TattvMu. 1. 18.

अंशानर्हत्व (aṁśānarha-tva) *n.* unworthiness to receive a share in the property एतेषां च वाचनिकमंशानर्हत्वं न पुनर्धर्मानधिकारित्वहेतुकम् Aparā. 750. 7. (*on* 2. 140)

अंशानुपपत्ति (aṁśānupapatti) *f.* the impossibility of having parts आत्मन्यंशानुपपत्तेः BrĀraUBh. 101. 4. (*on* 4. 7).

अंशानुबन्ध (aṁśānubandha) *m.* (= bhāgānubandha) a whole number increased by a fraction or a fraction increased by a fraction of itself साङ्घ्रित्रयं त्रयं व्यङ्घ्रि कीदृग् ब्रूहि सवर्णितम् । जानास्यंशानुबन्धं चेत् Līlā. 34; वेत्सि त्वमिह यदि सखेंऽशानुबन्धापवाहौ Līlā. 35.

अंशानुवृत्ति (aṁśānuvṛtti) *f.* continuity of the part अंशानुवृत्त्या वा वस्त्वनुगमेऽद्वैतवादः BrahmSi. 67. 8.

अंशान्त (aṁśānta) *adj.* ending with the key-note of a *rāga* असावंशादिरंशान्तपदावृत्तियुतो मतः SaṁgīRa. iii. 5. 85; न्यासान्तमथवांशान्तं विदार्यैकैककं मतम् SaṁgīRa iii. 5. 77.

अंशान्तर (aṁśāntara) *n.* **A** another part, protion, aspect, or feature यद्यप्येवंजातीयकोंऽशः समानत्वान्न विसंवादगोचरो भवत्यस्ति त्वंशान्तरं विसंवादस्थानम् BrahmSūBh.(S'aṅ.) 415. 3 (*on* ii. 2. 42); किं…तस्यैव यागस्यांशान्तरविवृद्ध्या रूपान्तरं जातम् TantrVā. 1027. 9 (*on* iii. 4. 47); 353. 10. (*on* ii. 1. 1); अहमिति निरंशं चैतन्यमात्रं प्रतिभासते नांशान्तरम् PañcPā. 5. 13; द्वादशभिरपि लक्षणैर्धर्म एको जिज्ञास्यः प्रतिलक्षणमंशान्तरपरिशोधनया PañcPā. 61. 20; 14. 8; न…परिपूर्णा कर्तव्यता भवति यावदंशान्तराणि…नावगतानि ManuBh. i. 6. 5 (*on* 1. 3); नांशिनोऽप्येकस्य भानाभाने, उक्तदोषप्राप्तेः । अंशान्तराभ्यां चेत्, अनवस्था IṣṭaSi. 13. 15; 115. 7; 268. 13; अंशस्याप्यंशान्तरसंभवे परमाणुमात्रे संयोगस्थितौ तस्याप्रत्यक्षत्वप्रसङ्गात् NyāyKa. 43. 23; एकस्यैवैकेनांशेन नित्यदुःखित्वादंशान्तरेण सुखित्वमपि नेश्वरत्वाय कल्पते VedāSaṁ. 106. 3; फलं तु प्रागेवांशान्तरसंबन्धादवगन्तुं शक्यते NyāyRaMā. 166. 9; वेद्यांश एव संस्कारजनितत्वेन स्मृतित्वं न त्वंशान्तरयोः TārkiRa. 21. 6; इदमंशस्य तु सत्यत्वमदोषजत्वम्, तस्यापि तथात्वेंऽशान्तरस्येव बाधप्रसङ्गात् TantrRaha. 8. 14; न हि प्रामाण्यांशे तथात्वमपहायांशान्तरयोः प्रकाशापूर्वत्वयोः संशय इति युक्तम् NyāyKu. 20. 12; आकाशाद्यनवस्थापन्नेन तदवस्थानापन्नेनांशान्तरेण च सन्मात्रं वाय्वाद्युपादानमिति चेन्न S'rutaPra. ii. 354. 25 (*on* ii. 3. 17); अंशोक्तावंशान्तरस्य वा निषेधः PratāYaBhū. 440. 8; एकदेशे तथाभूतवादित्वेऽप्यंशान्तरेऽतथाभूतवादिन्यपि प्रसङ्गात् NyāySu.(Ja.) 6A. 8 (*on* i. 1. 1) क्वचिदंशोक्तावंशान्तरे निषेधः SāhiDa. 587. 4; अंशान्तरस्य व्यङ्ग्यत्वेऽप्येकांशमादाय समासोक्त्यादीनामपि वाच्यालंकारव्यपदेशः RasGaṅ. 162. 5; **B** another form or partial incarnation अंशान्तरेण भूम्यां त्वं तत्र तिष्ठ सुनिर्वृतः KūrmaP. 7. 13 (1. 1); **C** deduction from the numerator, difference between the numerators संकलितेंऽशा योज्या व्यवकलितेंऽशान्तरं कार्यम् BrāhmSphuSi 12. 2; आयव्यययोः सदृशैश्छेदैरंशान्तरं कुर्यात् ĀryaSi. 15. 14 (147); तुल्यछेदायव्ययराश्योरंशान्तरं कुर्यात् Pāṭīgaṇita 32; **D** difference of degrees इष्टोनस्थितिगुणितं गत्योरंशान्तरं भुजो भवति ĀryaSi. 5. 14 (90); **E** another part of the melody अंशेंऽशान्तरसंचारादंशांश इति कीर्तितः SaṁgīRa. ii- 3. 140.

[**अंशापवाह** (aṁśāpavāha) *m.* a whole number diminished by a fraction or a fraction diminished by a fraction of itself वेत्सि त्वमिह यदि सखेंऽशानुबन्धापवाहौ Līlā. 35.]

अंशाप्त (aṁśāpta) *adj.* divided by the numerator अंशाप्तैकं व्यस्तं क्षिप्तेष्टघ्नं भवेत् सुवर्णमयी (सा गुलिका) GaṇiSāSaṁ. 5. 209; अंशाप्तं व्येकं फलम् GaṇiSāSaṁ. 5. 311.

अंशाभाव (aṁśābhāva) *m.* absence of parts or share किं जीवः सर्वकार्येषु सर्वसामर्थ्येन प्रवर्ततेंऽशेन वा ।…न द्वितीयः । अंशाभावात् TattvPrakā 90A. 5 (*on* ii. 1. 27); अनंशतः अंशाभावादित्यर्थः SmṛtiCan. i. 171. 3 = VīraMi. (Saṁskāra.) 551. 14.

अंशाभास (aṁśābhāsa) *m.* appearance of parts, apparent parts अंशाभासाश्च सर्वेऽपि परस्यांशा न मुख्यतः AnuVyā. 37A. 10 (*on* 2. 3); जीवानामंशाभासत्वं श्रुत्यन्तरेण दृढयति NyāySu.(Ja.) 454A. 9. (*on* ii. 3. 18)

अंशाभिप्राय (aṁśābhiprāya) *m.* reference to a part एकस्यापि प्रकारस्य नानाविधविशेषणयुक्तत्वाद् अंशाभिप्रायं बहुवचनम् TantrRa. 286. 3.

अंशाभिव्यक्तिता (aṁśābhivyakti-tā) *f.* manifestation of a part अंशाभिव्यक्तितता नाशो विनाशः सर्वलोपिता SivDṛ. 4. 57.